दिनाङ्क :- 03.07.2026

प्रात: - 06:55

## भारत-जापान-वक्तव्यमं्

प्रधानमन्त्री नरेन्द्रमोदी तस्य जापानस्य-समकक्षीया साने ताकाइची इत्येषा पाकिस्तानात् सीमापारे आतङ्कवादं समेत्य सर्वेषु रूपेषु अभिव्यक्तिषु आतङ्कवादस्य हिंसक-उग्रवादस्य च निन्दां कृतवन्तौ। भारत-जापान-वार्षिक-शिखर-सम्मेलनस्य संयुक्त-वक्तव्ये द्वौ नेतारौ गतवर्षे अप्रैलमासस्य विंशति-दिनाङ्के जम्मू-कश्मीरस्य पहलगाम इत्यत्र जातम् आतङ्क्याक्रमणं कट्वालोचितवन्तौ। उभौ प्रधानमन्त्री हिन्दप्रशान्तक्षेत्रस्य उभयो: देशयो: मध्ये सहयोगं विस्तारयितुं प्रतिबद्धतां पुनरुद्घाटितवन्तौ।

## भारत-जापान्-आर्थिक सुरक्षा

भारत-जापान्-विशेष-सामरिक-वैश्विक-सहभागित्वस्यआधारस्तम्भेषु अन्यतमार्थिकसुरक्षा-प्रधानतायाः विषये भारत-जापान्-देशौ परस्परं प्रतिबद्धतां पुनः दृढीकृतवन्तौ। आर्थिक-सुरक्षा-सहकारविषये भारत-जापान-संयुक्त-घोषणापत्रे अवदतां यत्, आर्थिक-सुरक्षा-सहभागित्वम् परस्परविश्वासस्य, सहभागिमूल्यानां, सम्बद्ध-हितानां च आधारेण वर्तते। उभयोः पक्षयोः समृद्धिः, सुरक्षा, आर्थिक-भविष्यं च सुदृढतया परस्परं सम्बद्धम् अस्ति इति मान्यता अस्ति। अद्यतनीकृतस्य मुक्तस्य च इण्डो-पेसिफिक् इत्यस्य तथा च म्यूचुवल् एण्ड् होलिस्टिक् अड्वान्स्मेण्ट् फ़ार् सिक्योरिटी एण्ड् डेवेलप्मेण्ट् इन् द रीजन्स् (MAHASAGAR) इति उपक्रमस्य समन्वयः उभयोः पक्षयोः कृते आर्थिक-सुरक्षा-सहकारं वर्धयितुं आवश्यकं प्रोत्साहनं प्रददाति इति घोषिताऽस्ति।

## ओम बिरला

लोकसभाध्यक्ष: ओम् बिरला अद्य कोलकातायां पश्चिमबङ्गाल विधानसभाया: नवनिर्वाचित-सदस्येभ्य: द्विदिवसीय-अभिविन्यास-कार्यक्रमस्य-उद्घाटनं करिष्यति। अस्य कार्यक्रमस्य उद्देश्यं

नवनिर्वानितेभ्य: सदस्येभ्य: समिति-व्यवस्था, वित्तीय-निरीक्षणं, संसदीय-विशेषाधिकारा:, विधायकेषु-उदयोन्मुख-आङ्किकीयोपक्रमा: इत्यादीनां संसदीय-विधायि-कार्याणां विविधपेक्षभ्य: परिचय-प्रदानं वर्तते ।

<u>पञ्चायती राज</u>

पञ्चायती राज मन्त्रालय: षोडश-वित्तीयायोगस्य अनुशंसानां विषये विचारार्थम् अद्य नवदिल्ल्यां राज्यस्य पञ्चायती- राज-मन्त्रिणाम् एकां राष्ट्रिय-कार्यशालाम् आयोजयति। कार्याशालाया: अध्यक्षतां केन्द्रीय-पञ्चायती–राज-मन्त्री राजीव-रञ्जन-सिंह: केन्द्रीयराज्य-मन्त्रिण: प्रो. एस.पी-सिंह बघेलस्य-उपस्थितौ करिष्यति। कार्यशालावधौ, चर्चा वित्तमन्त्रालयस्य व्यय-विभागद्वारा मुख्यवितस्य षोडश-वित्तीयायोग-ग्रामीण-स्थानीय-निकायानुदानस्य कार्यान्वयनाय परिचालन-दिङ्निर्देशेषु केन्द्रिता भविष्यति।

<u>अमरनाथ-यात्रा</u>

वार्षिक-श्री-अमरनाथ-यात्रा अद्य जम्मू-कश्मीरस्य पहलगाम-बालटाल-मार्गयोः आरभ्यते। सप्त पञ्चाशत्दिवसीयायां तीर्थयात्रायां, समग्र भारतदेशात् लक्षोपलक्षाः भक्ताः अमरनाथ-गुहा-तीर्थं प्रति पवित्रयात्रां करिष्यन्ति इत्यपेक्षा अस्ति। तीर्थयात्रिणः भगवतः शिवस्य आशीर्वादं प्राप्तुं, प्राकृतिकरूपेण निर्मितं हिमशिवलिङ्गं द्रष्टुं च प्रायः अष्टाशीत्यधिक अष्टशतोत्तरत्रीणिसहस्र मीटर्-परिमितेषु ऊर्ध्वतायां स्थित-पवित्र-अमरनाथगुहायां गच्छन्ति। आगस्त-मासस्य अष्टाविंशति दिनाङ्के रक्षाबन्धनोत्सवेन सह यात्रायाः परिसमाप्तिः भविष्यति। अवधेयं यत् वार्षिकस्याः श्री-अमरनाथ-जी-यात्रायाः कृते द्वा-विंशत्यधिक-अष्टशतोत्तर-चतुःसहस्र-तीर्थयात्रिणां प्रथमसमूहं जम्मू-नगरस्य भगवतीनगर-यात्रीनिवास-आधारशिबिरात् विस्तृतसुरक्षाव्यवस्थायां हरितध्वजं प्रदर्श्य उपराज्यपालेन मनोजसिन्हावर्येण ह्यः प्रेषितम्। देशस्य विभिन्नेभ्यः भागेभ्यः तीर्थयात्रिणः पवित्रयात्रायां भागग्रहणाय जम्मू-नगरम् आगच्छन्तः सन्ति।

**क्रिकेट**

महिलानां आईसीसी विंशतिं प्रतिविंशति विश्व-चषक-क्रिकेट्-प्रतिस्पर्धायां इङ्ग्लैण्डदलेन साउथ अफ्रीका दलं चत्वारिंशत् धावनाङ्कैः पराजितम्। रविवासरे अस्याः प्रतिस्पर्धायाः निर्णायकचक्रे इङ्ग्लैण्ड-आस्ट्रेलिया-दलयोर्मध्ये स्पर्धा भविष्यति।